सागरः, पुं, (सगरस्य राज्ञोऽयमिति । सगर+अण् ।) समुद्रः । इत्यमरः । १ । १० । १ ॥ सगरेणावतारितत्वात् तस्यायमिति अण् सागरो दन्त्यादिः । क्षीरोदादिष्वप्युपमया सागरव्यपदेशः इति भट्टाः । इति भरतः ॥ स तु सप्तविधः । यथा,—
"लवणः क्षीरसंज्ञश्च घृतोदो दधिसंज्ञकः ।
सुरोदेक्षुरसोदौ च स्वादूदः सप्तमो भवेत् ॥
चत्वारः सागरा ख्याताः पुष्करिण्यश्च ताः स्मृताः ॥"
इत्याद्य वह्निपुराणे गणभेदनामाध्यायः ॥ * ॥ (सगरस्यापत्यं पुमानिति । सगर+अण् । सगरपुत्त्रः । यथा, महाभारते ।३।१०७।७ ।
"वध्यमानास्ततो लोकाः सागरैर्मन्दबुद्धिभिः ।
ब्रह्माणं शरणं जग्मुः सहिताः सर्व्वदैवतैः ॥")
मृगविशेषः । इति शब्दचन्द्रिका ॥ दशपद्मसंख्या । यथा,—
"विन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः॥"
इति ब्रह्माण्डपुराणम् ॥
(सागरस्येदमिति । सागरसम्बन्धिनि, त्रि । यथा, हरिवंशे । ५३ । ३८ ।
"बाधतस्त्र सरितां नाथ त्यक्त्वेमां सागरीं तनुम् ॥")
सागरगामिनी,स्त्री, (सागरं गच्छतीति । गम+णिनिः । ङीप् ।) नदी । इति त्रिकाण्डशेषः ॥ (वाच्यलिङ्गेऽपि दृश्यते । यथा, रघुः ।६ । ५२ ।
नृपं तमावर्त्तमनोज्ञनाभिः
सा व्यत्यगादन्यवधूर्भवित्री ।
महीधरं मार्गवशादुपेतं
स्रोतोवहा सागरगामिनीव ॥")
सूक्ष्मैला । इति राजनिर्घण्टः ॥
सागरनेमिः, स्त्री, (सागरः नेमिरिव यस्याः । ) पृथिवी । इति हेमचन्द्रः ॥
सागरमेखला, स्त्री, (सागरः मेखलेव यस्याः ।). पृथिवी । इति हेमचन्द्रः ॥ ( वाच्यलिङ्गेऽपि दृश्यते । यथा, महाभारते । ३ । १०७ । ६४।
"अंशुमानपि धर्म्मात्मा महीं सागरमेखलाम् ।
प्रशशास महाराज ! यथैवास्य पितामहः ॥")
सागराम्बरा, स्त्री, ( सागरः अम्बरं वस्त्रमिव यस्याः ।) पृथिवी । इति हेमचन्द्रः ॥ ( यथा, रघुः । ३ । ९ ।
"निधानगर्भामिव सागराम्बरां
शमीमिवाभ्यन्तरलीनपावकाम् ।
नदीमिवान्तःसलिलां सरस्वतीं
नृपः ससत्त्वां महिषीममन्यत ॥")
सागरालयः, पुं, ( सागरः आलयो यस्य । ) वरुणः । इति शब्दमाला ॥
सागरोत्थं,क्ली,(सागरादुत्तिष्ठतीति । उत्+स्था+कः ।) समुद्रलवणम् । इति राजनिर्घण्टः ॥
साङ्कलं, त्रि, (सङ्कल+"सङ्कलादिभ्यश्च ।" ४ । २ । ७५ । इति अञ् ।) सङ्कलेन निर्वृत्तम् । सङ्कलनाज्जातम् । इति सिद्धान्तकौमुदी ॥

साङ्कृतिः,पुं, मुनिविशेषः । स तु वैयाघ्रपद्यगोत्रस्य प्रवरः । यथा,—
"वैयाघ्रपद्यगोत्राय साङ्कृतिप्रवराय च ।
अपुत्त्राय ददाम्येतत् सलिलं भीष्मवर्म्मणे ॥"
इति तिथ्यादितत्त्वम् ॥
साङ्क्षेपिकः,त्रि,(सङ्क्षेपाय हितः । सङ्क्षेप+ठञ् ।) संक्षिप्तः । इति सिद्धान्तकौमुदी ॥ ( यथा, मनुटीकायां कुल्लूकः । १२ । ३४ ।
"इदं वक्ष्यमाणं साङ्क्षेपिकं क्रमेण लक्षणं ज्ञातव्यम् ॥") संक्षेपकारकः । संक्षेपशब्दात् ष्णिकप्रत्ययनिष्पन्नः ॥
साङ्ख्यः,पुं, कपिलमुनिकृतदर्शनशास्त्रविशेषः । तत्पर्य्यायः । कापिलः २ । इति हेमचन्द्रः ॥ तथा च ।
"साङ्ख्यं कपिलमुनिना प्रोक्तं
संसारविमुक्तिकारणं हि ।
यत्रैताः सप्ततिरार्य्या
भाष्यं चात्र गौड़पादकृतम् ॥
एतत् पवित्रमग्र्यं
मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय
तेन च बहुधा कृतं तन्त्रम् ॥
शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्य्याभिः संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम्॥
सप्तत्यां किल येऽर्था-
स्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिका विरहिताः
परवादविवर्ज्जिताश्चापि ॥"
इति साङ्ख्यप्रवचनभाष्यम् ॥
साङ्ख्ययोगः, पुं, (साङ्ख्योक्तो योगः ।) ज्ञानयोगः । स च ब्रह्मविद्या । यथा,—
"शौतीये शोकसन्तप्तमर्ज्जुनं ब्रह्मविद्यया ।
प्रतिबोध्य हरिश्चक्रे स्थितप्रज्ञस्य लक्षणम् ॥"
इति गीताटीकायां श्रीधरस्वामी ।२।१॥ तद्योगो यथा,—
श्रीभगवानुवाच ।
"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥
न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्व्वे वयमतः परम् ॥
देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥
मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदुःखदाः
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥
यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते ॥
नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।
अविनाशि तु तद्विद्धि येन सर्व्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्त्तुमर्हति ॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्मात् युध्यस्व भारत ॥
य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥
न जायते म्रियते वा कदाचि-
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥
वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ ! कं घातयति हन्ति कम्
वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ॥
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्यः सर्व्वगतः स्थाणुरचलोऽयं सनातनः ॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्य्योऽयमुच्यते ।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥
अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम् ।
तथापि त्वं महाबाहो ! नैनं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥"
इत्यादि श्रीभगवद्गीतायां साङ्ख्ययोगे ।२। ११—३० ॥*॥
साङ्गमः, पुं, (सङ्गम एव । स्वार्थे अण् ।)सङ्गमः । इत्यमरटीकायां भरतः । ३ । २ । १९ ॥
साङ्ग्रामिकः, पुं, ( संग्रामे साधुः । संग्राम+"गुड़ादिभ्यष्ठञ् ।" ४ । ४ । १०३ । इति ठञ् ।) सेनापतिः । सङ्ग्रामकुशले, त्रि । इति सिद्धान्तकौमुदी ॥ (सङ्ग्रामसम्बन्धिनि च त्रि । यथा, महाभारते । १ । २ । २३२ ।
"ते तस्य वचनं श्रुत्वा मन्त्रयित्वा च यद्धितम् ।
साङ्ग्रामिकं ततः सर्व्वं सज्जं चक्रुः परन्तपाः॥")
साङ्मुखी, स्त्री, (सङ्मुखाय हिता । सङ्मुख+अण् । ङीप् । ) सायाह्नव्यापिनी तिथिः । यथा,—
"पञ्चमी सप्तमी चैव दशमी च त्रयोदशी ।
प्रतिपन्नवमी चैव कर्त्तव्या साङ्मुखी तिथिः ॥"
इति पैठीनसिवचनस्य तु ।
'साङ्मुख्यं नाम सायाह्नव्यापिनी दृश्यते यदा ।'
इति स्कन्दपुराणेन सायाह्नव्यापितिथेः साङ्मुख्यविधानेन पूजादावनवकाशादुपवासपरत्वम् । सायाह्नव्यापित्वमपि मुहूर्त्तान्यूनत्वेन ज्ञेयम् ।"
इति तिथ्यादितत्त्वम् ॥
साचि,अव्य,(सच+इण् ।) तिर्य्यगर्थः । तत्पर्य्यायः । तिरः २ । इत्यमरः । ३ । ४ । ६ ॥ ( यथा, किराते । १० । ५७ ।
"सविनयमपराभिसृत्य साचि
स्मितसुभगैकलसत्कपोललक्ष्मीः ॥")
साचिव्यं,क्ली, (सचिव+ष्यञ् ।)सचिवस्य भावः । सचिवशब्दात् भावे ष्यप्रत्ययेन निष्पन्नम् ॥ ( यथा, रामायणे । ५ । ५ । १ ।